द्योतते १० द्युमत् ११ । इत्येकादश ज्वलतिकर्म्माणः । इति वेदनिघण्टौ १ अध्यायः ॥

ज्वलनः, पुं, ( ज्वलतीति । ज्वल+"जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ।" ३ । २ । १५० । इति युच् । ) अग्निः । ( यथा, कलाविलासे । १ । ४ ।

"यत्र त्रिनयननयनज्वलनज्वालावलीशलभवृत्तिः ।
जीवति मानसजन्मा शशिवदनावदनकान्तिपीयूषैः ॥")

चित्रकवृक्षः । इत्यमरः ।२।४।५६ ॥ ( ज्वल+भावे ल्युट् । ) दहने, क्ली ॥

ज्वलनाश्मा, [न्] पुं, ( ज्वलनः सूर्य्यवद्दीप्तिविशिष्टः अश्मा प्रस्तरमणिः । नित्यकर्म्मधारयः ।) सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥

ज्वलितः, त्रि, (ज्वल+क्तः । ) दग्धः । उज्ज्वलः । इति मेदिनी । ते, ११० ॥ (प्रदीप्तः । यथा, महाभारते । ६ । १८ । ६ ।

"काञ्चनाङ्गदिनो रेजुर्ज्वलिता इव पावकाः ॥")

ज्वलिनी, स्त्री, ( ज्वलो दीप्तिरस्त्यस्याः । ज्वल+इनिः+ङीप् । ) मूर्व्वालता । इति राजनिर्घण्टः ॥

ज्वालः, पुं स्त्री, (ज्वलतीति । ज्वल+"ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः । पक्षे स्त्रियां टाप् ।) अग्निशिखा । इत्यमरः ।१।१।६०॥ ( यथा, महाभारते । ३ । २१८ । ३ ।

"दीप्तो ज्वालैरनेकाभैरग्निरेषोऽथ वीर्य्यवान् ॥")

दीप्तिविशिष्टे, त्रि । इति मुग्धबोधम् ॥

ज्वाला, स्त्री, दग्धान्नम् । इति शब्दचन्द्रिका ॥ (ज्वलतीति । ज्वल+णः+टाप् ।) अग्निशिखा । इत्यमरः । १ । १ । ६० ॥ (यथा, विष्णुपुराणे । १ । १२ । २४ ।

"अभ्युद्यतोग्रशस्त्राणि ज्वालामालाकुलैर्म्मुखैः ॥")

दाहश्च ॥ ( स्वनामख्याता ऋक्षस्य पत्नी । यथा, महाभारते । १ । ९५ । २५ ।

"ऋक्षः खलु तक्षकदुहितरमुपयेमे ज्वालां नाम । तस्यां पुत्त्रं मतिनारं नामोत्पादयामास ॥")

ज्वालागर्द्दभकः, पुं, ( जालगर्द्दभ+स्वार्थे कन् । ततः पृषोदरादित्वात् साधुः । ) रोगविशेषः । तत्पर्य्यायः । ज्वलारासभकामयः २ ज्वालाखरगदः ३ गर्द्दभगदः ४ । इति राजनिर्घण्टः ॥ अस्य लक्षणं जालगर्द्दभशब्दे द्रष्टव्यम् ॥

ज्वालाजिह्वः, पुं, ( ज्वाला शिखा एव जिह्वा यस्य । ) अग्निः । इति हेमचन्द्रः । ४।१६५ ॥ ( स्कन्दस्यानुचरविशेषः । यथा, महाभारते ९ । ४५ । ५८ ।

"ज्वालाजिह्वः करालश्च शितकेशो जटी हरिः ॥"

दानवविशेषः । स तु वलिराजस्य सेनानीविशेषः । यथा, हरिवंशे । २३२ । ६ ।

"करालो ज्वालजिह्वश्च शताङ्गः शतलोचनः ॥")

ज्वालामुखी, स्त्री, (ज्वालैव मुखं प्रधानं यस्याम् । तत्राजस्रप्रज्वलितज्वालाभिरेव पूजादिकं गृह्णाति देवीत्यतोऽस्यास्तथात्वम् । ) पीठस्थानविशेषः । तत्र भगवत्या जिह्वा पतिता । तत्र अम्बिका देवी । उन्मत्तनामकभैरवश्च । इति पीठमाला ॥ यथाच ।

"जालामुख्यां महाजिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदा नाम्नी स्तनं जालन्धरे मम ॥"

इति तन्त्रचूडामणौ पीठनिर्णयः ॥

विद्याविशेषः । यथा,—

"ज्वालामुखीक्रमं वक्ष्ये सा पूज्या मध्यतः शुभे ! ।
नित्यारुणा मदनान्तरा मदमोहापहन्त्यपि ॥
कमला श्रीभारती च आकर्षणी महेन्द्रापि ।
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डेति च पूजयेत् ।
विजया चाजिता चैव मोहनी चापराजिता ॥
स्तम्भनी जपनी पूज्या कालिका पद्मवाह्यतः ।
ज्वालामुखीक्रमं पूज्य विषादिहरणं भवेत् ॥"

इति गारुडे ज्वालामुखीविद्या २०४ अध्यायः ॥

---

## झ

झ, झकारः । स व्यञ्जननवमवर्णः चवर्गचतुर्थवर्णश्च । अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ ( यदुक्तं शिक्षायाम् । १७ ।

"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥")

अस्योत्पत्तिर्यथा,—

"विसर्गस्तालुगः क्षोभा यं चवर्गश्च यन्तथा ॥"

इति प्रपञ्चसारः ॥

(वङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,

"त्रिकोणकुण्डलीरूपा वामदक्षिणयोगतः ।
क्रमशस्तासु तिष्ठन्ति चन्द्रसूर्य्याग्नयः प्रिये ! ॥
तत्र क्रोड़गता मात्रा शक्तिर्ब्रह्मस्वरूपिणी ।
ऊर्द्ध्वमात्रा तथेन्द्राणी मध्ये नारायणी स्मृता ॥"

अस्य ध्यानं यथा, वर्णोद्धारतन्त्रे ।

"ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! ।
सन्तप्तहेमवर्णाभां रक्ताम्बरविभूषिताम् ॥
रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम् ।
चतुर्द्दशभुजां देवीं रत्नहारोज्ज्वलां पराम् ॥
ध्यात्वा ब्रह्मस्वरूपां तां तन्मन्त्रं दशधा जपेत् ॥"

अस्य स्वरूपं यथा,—

"झकारं परमेशानि ! कुण्डली मोक्षरूपिणी ।
रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम् ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिविन्दुसहितं वर्णं त्रिशक्तिसहितं तथा ॥"

इति कामधेनुतन्त्रम् ॥

तस्य ३५ पञ्चत्रिंशत् नामानि यथा,—

"झो झङ्कारी गुहो झञ्झावायुः सव्यः यडुन्नतः ।
अजेशो द्राविणी नादः पाशी जिह्वा जलं स्थितिः ॥
विराजेन्द्रो धनुर्हस्तः कर्कशो नादजः कुजः ।
दीर्घवाहुबलो रूपमाकन्दितः सुचञ्चलः ॥
दुर्म्मुखो नष्ट आत्मवान् विकटा कुचमण्डलः ॥
कलहंसप्रिया वामा अङ्गुलीमध्यपर्व्वकः ।
दक्षहासाट्टहासश्च पाशात्मा व्यञ्जनः स्वरः ॥"

इति नानातन्त्रशास्त्रम् ॥

झः, पुं, ( झटति संहतीभवतीति । झट संहतौ+वाहुलकात् डः । ) झञ्झावातः । अम्बुवर्षणम् । इति शब्दरत्नावली ॥ झटीशः । सुरगुरुः । दैत्यराजः । ध्वनिः । तारवायुः । इति मेदिनी । झे, १ ॥ नष्टे, त्रि । इति शब्दरत्नावली ॥

झगझगायमानः, त्रि, ( झगझग इवाचरतीति । झगझग+"कर्त्तुः क्यङ् सलोपश्च ।" ३।१।११। इति क्यङ् ततः शानच् । ) चाकचिक्ययुक्तः । झकझकिया इति भाषा । यथा,—

"मयूरवरगामिनीं सुरदमुख्यवर्णोत्कटां
रणक्वणितघण्टिकां निशितशक्तिहस्तोद्यताम् ।
प्रभानिकररश्मिभिर्झगझगायमानांशुकां
नयामि गुहसम्भवां त्रिदशशत्रुनिर्णाशिनीम् ॥"

इति देवीपुराणे रुरुवधे मातृस्तवनामाध्यायः ॥

झङ्कारः, पुं, (कृ+भावे घञ् कारः । झमित्यव्यक्तशब्दस्य कारः करणं यत्र । ) भ्रमरादिशब्दः । यथाह वल्लालसेनः ।

"प्रारब्धो मधुपैरकारणमहो झङ्कारकोलाहलः ॥"

(तथा च पञ्चतन्त्रे । ५ । ४८ ।

"शरच्छशोत्स्नाहते दूरं तमसि प्रियसन्निधौ ।
धन्यानां विशति श्रोत्रे गीतझङ्कारजा सुधा ॥")

झञ्झा, स्त्री, ( झमित्यव्यक्तशब्देन झटति वेगेन वहतीति । झट्+वाहुलकात् डः । ततष्टाप् । ) ध्वनिविशेषः । जलकणवर्षणम् । इति शब्दरत्नावली ॥

झञ्झानिलः, पुं, ( झञ्झाध्वनियुक्तोऽनिलः । ) प्रावृषिजवायुः । झञ्झावातः । इति त्रिकाण्डशेषः ॥

झञ्झावातः, पुं, ( झञ्झाध्वनियुक्तो वातः । ) प्रावृषिजवायुः । इति हलायुधः ॥ ( यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये ।

"झञ्झावातं रक्तवृष्टिं वात्याश्च वृक्षपातनम् ॥")

झट, संहतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) झटति केशः । परस्परं लग्नः स्यादित्यर्थः । इति दुर्गादासः ॥

झटिः, पुं, ( झटति परस्परं संलग्नो भवतीति । झट संहतौ+"सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) क्षुद्रवृक्षः । इत्युणादिकोषः ॥

झटिति, व्य, द्रुतम् । शीघ्रम् । तत्पर्य्यायः । स्राक् २ अञ्जसा ३ अह्नाय ४ सपदि ५ द्राक् ६ मंक्षु ७ । इत्यमरः । ३ । ४ । २ ॥ ( यथा, पञ्चदश्यां । ७ । १२५ ।

"तत्त्वविस्मृतिमात्रान्नानर्थः किन्तु विपर्य्ययात् ।
विपर्य्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित् ॥")

झत्ति, व्य, ( झटिति इति शब्दस्य प्राकृतभाषायां झत्ति इति सिद्धम् । ) झटिति । इति प्राकृतभाषायां काव्यप्रकाशः ॥